# वैदिकसाहित्ये सष्ट्युत्पत्तिविवेचनम्

**ट्विंकल बंसल**
**लालाशंकर गयावाल**

'सर्वज्ञानमयो हि सः' इति वदता मनुना वेदानां सर्वविधज्ञानत्वम् उरीकतम्। विश्वोत्पत्ते एतिह्यं गवेषितं चेत् तर्हि वेदा एव सर्वप्रमुखत्वेन दष्टिपथमवतरन्ति। अस्याः सष्टेः कथमिव विकासो भूत् इत्यर्थं वेदानुशीलनम् अनिवार्यं प्रतिपद्यते। तत्र एव क्रमिकविकासस्य प्रक्रिया प्राप्यते। लौकिकाध्यात्मज्ञानराशिना सह सष्टिविज्ञानमपि वेदेषु सर्वतः प्रसतो स्ति। सष्टिसर्गेण सह सष्टिविज्ञानमपि सष्टिविकासक्रमाश्च वेदेषु वैज्ञानिकरूपेण विस्तरशः प्रतिपादिताः। सष्टिक्रमः–सष्टिनिर्माणं–प्राचीनता–रचना–आयु–इत्यादीनि महत्त्वपूर्णानि तथ्यानि तत्र अनुसंधीयन्ते। येषां समालोचनेन विविधप्राकतिकानां सिद्धान्तानां मानवज्ञाननिध्यां नवीनाध्यायानां संयोगः संभावितः।

वेदशब्दः मुख्यत्वेन ऋग्यजुसामथर्वनामभिः प्रचलितानां चतसणां वेदसंहितानां बोधकः। वैदिकसाहित्यशब्देन ४५२४ वेदग्रन्थानां मन्त्र–ब्राह्मण–आरण्यं–उपनिषद्–संग्रहरूपो निधिः गह्यते। उक्तञ्च –

**''मन्त्रब्राह्मणयोर्वेद नामधेयम्।''**

(बौधायन गह्यसूत्र, ३.२.६३)

सष्ट्युत्पत्त्याः प्राक्तनाया अवधारणायाः विवेचनाद् पूर्वं मानवमस्तिष्कस्य जिज्ञासेयम् अनावरणीया यत् कथमभूत् विश्वस्यास्य निर्मितिः। प्राक्तने कः आसीत् ? कथं सूर्य–नक्षत्र–ग्रह–उपग्रहाः निर्मितः। रहस्यमिदं अद्यापि यथापूर्वम्। एतेषाम् अनावरणाय रहस्यानां प्राचां ऋषीणां वैज्ञानिकावधारणाः प्रस्तुताः।

सष्ट्युत्पत्तेर्मूलतत्त्वानुसंधीयते चेत् सत्ऋते एव तन्मूलस्रोतत्वेनोपतिष्ठन्ति। अनयोराधारौ स्वयं भू–परमेष्ठीलोकश्च भवतः एते एव कालान्तरे अग्निः तथा च सूर्यचन्द्रमसोः रूपतामुपयाति। सतत् गतिशीलम् एतत् संचरणम्। अनेन एव क्रमेण पार्थिवसष्टिः स्वीयं स्वरूपमाप्तुं पार्यते। वेदेषु मंत्रदष्ट्रिभिः ऋषिभिः सष्ट्युत्पत्त्यवधारणाः प्रत्यक्षीकता प्रश्नोत्तरशैल्या। ऋग्वेदस्य दशममण्डले तथ्यमिदं पर्याप्तं वर्णितम्। प्रथमतः मुख्यत्वेन च ऋग्वेदे इत्थं तात्कालिकप्रक्रियावस्था च विशदीभवतः –

**''नासतो विद्यते भावो, नाभावो विद्यते सतः।[1]''**

अर्थात् नाभावाद् भावः समुत्पद्यते यतोहि पदार्थ अविनाशी। पदार्थानन्त्वाद् तस्यानादित्वमपि अनिवार्यम्। एषः सष्टिसर्गप्रलयस्य अविखण्डितः क्रमः। विश्वरचनायां सर्वत्रनियम–बुद्धिप्रयोजनानां समन्वयो दश्यते। कः सजनप्रलययोः चक्रकालः। तथ्यमेतद् ऋग्वेदस्य दशममण्डलान्तर्गते एकोनविंशत्यधिकशते सूक्ते सप्तमन्त्रेषु स्पष्टीकतं नासदीय– सूक्ते – सष्टिक्रमः –

**''को अद्धा वेदा क इह प्रावोचतकुत आजाता कुत इयं विसष्टिः।**
**अर्वाग्देवा अस्य विसर्जनेनाया को वेद यत् आवभूव।''**[२]

यथार्थः केन ज्ञायते ? कुतः इयं विविधप्रकारिका सष्टिराबभूव ? कः मूलकारणम् ? सष्टिनिर्माणस्य प्रत्यक्षद्रष्टारः मानवाः भवितुं न शक्यन्ते–

**''इयं विसष्टिर्यत आबभूव यदि वा दधे यदि वा न।**
**यो स्याध्यक्षः परमेव्योमन्त्सो अंग वेद यदि वा न वेद।।''**[३]

यतः इयं सष्टिर्व्युत्पन्ना, यः अस्याः अधिष्ठाता स एव अस्मिन् विषये जानाति। पुनश्च बुद्धिजन्यानि प्रत्यक्षाधारितानि उत्तराणि अग्रिमेषु मन्त्रेषु प्राप्यन्ते।

**''नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।**
**किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम्।''**[४]

सष्टिप्रारम्भे या वस्था तस्या स्थूलजगत्, सूक्ष्मजगत्, अन्तरिक्षं आकाशं किमपि नासीत्। कुत्रासीत् गहनपंचमहाभूतानां मूलभूतकारणम्। मन्त्रे भावो यम् अवगम्यते ईश्वर–जीव–प्रकतिप्यतिरिक्तं कार्यजगतरूपे किमपि न प्रामाण्यम् –

**''तम आसीत्तमसा गूढम ग्रेप्रकेतं सलिलं सर्वमा ईदम्।**
**तुच्छयेनाभ्वपिहितं यदासीत् तपसतन्महिनाजायतैकम्।''**[५]

तदा प्रकतिः ईक्षणाद् (ईश्वरप्रदत्तगतेः) परिवर्तीभूय कार्यरूपेण परिणता। प्रकतिकार्यजगतः बन्धुत्वं ऋग्वेदेमान्यम्। सष्टिक्रमस्य अस्य नियन्ता ईश्वरः। दशममण्डलस्य मन्त्रो यं सष्टिरचनाक्रमं स्पष्टीकरोति –

**''ऋतं च सत्यञ्चाभीद्धात्तपसो ध्यजायत।**
**ततो राज्यजायत ततः समुद्रो र्णव।''**[६]

तपसः, ऋतं, ऋत सत्यं पुनश्च अर्णवोद्भूत्।

सष्टिनिर्माणम् – सर्गनिर्माणे ब्रह्म–माया कणेतत्संघातत्रयं बीजभूतं सम्मतम्। तैत्तिरीयारण्यकानुसारं सष्टिनिर्माणप्रक्रिया अग्रांकितरूपेण सम्पद्यते –

'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः। आकाशाद् वायुः। वायोरग्निः। अग्नेरापः। अप्भ्यः पथिवी। पथिव्या औषधयः। औषधिभ्यो न्नम्। अन्नाद्रेतः। रेतसः पुरुषः। स वा एष पुरुषो अक्षरसमयः।[७] सष्टिनिर्माणविषये ऋग्वेदे कथितम् –

**'तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।**
**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।''**[८]

ऋक् इदमपि द्रष्टव्यम् –

**''ऋक्भ्यो जातां सर्वशोमूर्तिमाहुः।**
**सर्वा गतिर्याजुषी हैव शश्वत्।**
**सर्वः तेजः सामरूप्यं ह शश्वत्।**
**सर्व हेदं ब्रह्मणा हैव सष्टुम्।''**[९]

कस्यापि पदार्थस्य प्रारम्भिकं स्थूलञ्च रूपम् – ऋक्, सूक्ष्मतमं–साम, मध्यवर्तिश्च–यजुः। एवमेव गीतायां क्षर–अक्षर–अव्ययस्य त्रिकं समुपस्थितम्। तथैव सच्चिदानन्दस्य सत् चित् आनन्दः।

सष्टि–आयु – अथर्ववेदस्याष्टमकाण्डे सष्टिरायुपद्धतिः इत्थं विविक्ताः –

**''शतं ते युतं हायनान् द्वे युगे त्रीणि चत्वारि कष्मः।**
**इन्द्राग्नी विश्वे देवास्ते अनुमन्यतामहृणीयमाना।।''**[१०]

एवं प्रस्तूयते गणना समासतः –

''सर्वप्रथमं विश्वोत्पत्तेः वर्षाणां दशलक्षपर्यन्तं शून्यीकरणं कत्वा २,३,४ क्रमेण आयोज्यते, गणनापश्चात् स्थितिरियं दश्यते – ४३२००००००००

सष्टिसर्गात् प्रलयपर्यन्तं विश्वस्य समग्रायुः द्वात्रिशद् कोट्यधिक–चतुरार्बुदं वर्षाः सन्ति।

समग्रेनानेन विवेचनेन पष्ठभूम्यां धारणेयं दढ़तया विशदीभवति यत् जीवजगत्सन्दर्भे वेदमहर्षिभिः दर्शनातिरिक्तं विवेचनरहितं च किमपि न उपलभ्यते। वेदेषु सष्ट्युत्पत्ति–विकास– निर्माणविषयकानां वैज्ञानिक–तथ्यानां प्राचुर्येण समुल्लेख प्राप्यते। समवेतत्वेन ब्रह्माण्डस्य सूक्ष्मतमानां तत्त्वानां या विस्तता व्याख्या वेदैः प्रदत्ता सा पाश्चात्यविदुषां विज्ञानमपि विफलीकरोति। अतएव समीचीनमेव कथनमिदं चेद् अंतरिक्षान्वेषणे क्रियतां

उद्यमानां अल्पांशमपि वेदविद्याध्ययने भविष्यत् तर्हि मानवविश्वयोः द्वयोरेव कल्याणं निश्चितम्।

*संस्कतविभागः*
*रामेश्वरी देवी राजकीय–*
*कन्या महाविद्यालयः,*
*भरतपुर (राज.)*

**सन्दर्भ सूची -**

---

[१] ऋग्वेद १०.१२६.१
[२] वही, १०.१२६.६
[३] वही, १०.१२६.७
[४] वही, १०.१२६.१
[५] वही, १०.१२६.२
[६] वही, १०.१६०.१
[७] तैत्तिरीय आरण्यक,
[८] ऋग्वेद, दशमकाण्ड, १०.६०.६
[९] तैत्तिरीय ब्राह्मण, ३/१२/६/१
[१०] अथर्ववेद, अष्टमकाण्ड, सूक्त २ मंत्र २१।

———ooo———